

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## पञ्चमकाण्डे षष्ठः प्रश्नः

### उपानुवाक्याभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निर्या गर्भन्दधिरे विरू-
पास्ता न आपः शङ्ग् स्योना भवन्तु॥ यासाꣳ राजा वरुणो याति मद्ध्ये सत्यानृते अवपश्यन्
जनानाम्। मधुश्चुतः शुचयो याः पावकास्ता न आपः शङ्ग् स्योना भवन्तु॥ यासान्देवा दिवि
कृण्वन्ति भख्षय्ँया अन्तरिख्षे बहुधा भवन्ति। याः पृथिवीम्पयसोन्दन्ति ॥ [१] ॥ शुक्रास्ता
न आपः शङ्ग् स्योना भवन्तु॥ शिवेन मा चख्षुषा पश्यताऽऽपः शिवया तनुवोप स्पृशत
त्वचम्मे। सर्वाꣳ अग्नीꣳरप्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त॥ यददः संप्रयतीरहाव-
नदता हते। तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः॥ यत् प्रेषिता वरुणेन ताः शीभꣳ
समवल्गत ॥ [२] ॥ तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु स्थन॥ अपकामङ्ग् स्यन्दमाना
अवीवरत वो हिकम्। इन्द्रो वः शक्तिभिर् देवीस्तस्माद्वार् णाम वो हितम्॥ एको देवो अप्य-
तिष्ठथ् स्यन्दमाना यथा वशम्। उदानिषुर् महीरिति तस्मादुदकमुच्यते॥ आपो भद्रा घृतमिदाप
आसुरग्नीषोमौ बिभ्रत्याप इत् ताः। तीव्रो रसो मधुपृचा ॥ [३] ॥ मरंगम आ मा प्राणेन सह
वर्चसा गन्न्॥ आदित् पश्याम्युत वा श्रृणोम्या मा घोषो गच्छति वाङ् न आसाम्। मन्ये भेजानो
अमृतस्य तर्हि हिरण्यवर्णा अतृपय्ँयदा वः॥ आपो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन।
महे रणाय चख्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ तस्मा

अर॑ङ्गमाम वो॒ यस्य॒ ख्षया॑य॒ जिन्व॑थ। आपो॑ ज॒नय॑था च नः॥ दि॒वि श्र॑यस्वा॒न्तरि॑ख्षे यतस्व
पृथि॒व्या सम्भ॑व ब्रह्मव॒र्चसम॑सि ब्रह्मव॒र्चसाय॑ त्वा ॥ [४] ॥

(उ॒न्दन्ति॑ स॒मव॑ल्गात मधु॒पृचा᳚ मा॒तरो॒ द्वावि॑ꣳशतिश्च) ॥ १ ॥

अ॒पाङ्ग्रहा᳚न् गृह्णात्ये॒तद् वाव रा॑ज॒सू॒यय्ँयदे॒ते ग्रहा᳚ः स॒वो᳚ऽग्निर्व॑रुणस॒वो रा॑ज॒सूय॑मग्निस॒व-
श्चि॒त्य स्ताभ्या॑मे॒व सू॑यतेऽथो॑ उ॒भावे॒व लो॒काव॒भि ज॑यति॒ यश्च॑ राज॒सूये॑नेजा॒नस्य॒ यश्चा᳚ऽग्नि॒चित॒
आपो॑ भ॒वन्त्यापो॒ वा अ॒ग्नेर् भ्रातृ॑व्या॒ यद॒पो᳚ऽग्नेर॒धस्ता॑दु॒प दधा॑ति॒ भ्रातृ॑व्याभिभूत्यै॒ भव॑त्या॒त्मना॒
परा᳚ऽस्य॒ भ्रातृ॑व्यो भवत्यमृ॒त ॥ [५] ॥ व्वाँ आ॒पस्तस्मा॑द॒द्भिरव॑तान्तम॒भि षि॑ञ्चन्ति॒ नाऽऽर्ति॒-
मार्च्छ॑ति॒ स॒र्वमा॒यु॑रेति॒ यस्यै॒ता उ॑पधी॒यन्ते॒ य उ॑ चैना ए॒वव्ँवेदा॒न्नव्ँवा आप॑ः प॒शव॒ आपोऽन्न॒म्प॒श-
वो᳚ऽन्ना॒दः प॑शु॒मान् भ॑वति॒ यस्यै॒ता उ॑पधी॒यन्ते॒ य उ॑ चैना ए॒वव्ँवे॒द् द्वाद॑श भवन्ति॒ द्वाद॒॑श मासा᳚ः
सव्ँव॒थ्स॒रः स॑व्ँवथ्स॒रेणै॒वास्मा॒ ॥ [६] ॥ अन्न॒मव॑ रुन्धे॒ पात्रा॑णि भवन्ति॒ पात्रे॒ वा अन्न॑मद्यते॒
स॒यो᳚न्ये॒वान्न॒मव॑ रुन्ध॒ आ द्वा॑द॒शात् पुरु॑षा॒दन्न॑ म॒त्त्यथो॒ पात्रा॒न्न छि॑द्यते॒ यस्यै॒ता उ॑पधी॒यन्ते॒ य उ॑
चैना ए॒वव्ँवेद॑ कु॒म्भाश्च॑ कु॒म्भीश्च॑ मिथु॒नानि॑ भवन्ति मिथु॒नस्य॒ प्रजा᳚त्यै॒ प्र प्र॒जया॑ प॒शुभि॑र् मिथु॒नैर्
जा॑यते॒ यस्यै॒ता उ॑पधी॒यन्ते॒ य उ॑ ॥ [७] ॥ चैना ए॒वव्ँवे॒द् शुग् वा अ॒ग्निः सो᳚ऽद्ध्व॒र्युय्ँयज॑मान-
म्प्र॒जाः शु॒चाऽर्प॑यति॒ यद॒प उ॑प॒दधा॑ति॒ शुच॑मे॒वास्य॑ शमयति॒ नाऽऽर्ति॒मार्च्छ॑त्य॒द्ध्व॒र्युर् न यज॑-
मा॒नः शाम्य॑न्ति प्र॒जा यत्रै॒ता उ॑पधी॒यन्ते॒ ऽपाव्ँवा ए॒तानि॒ हृद॑यानि॒ यदे॒ता आपो॒ यदे॒ता अ॒प उ॑प॒-
दधा॑ति दि॒व्याभि॑रे॒वैना॒ः सꣳ सृ॑जति॒ व॒र्षुक॑ः प॒र्जन्यो᳚ ॥ [८] ॥ भवति॒ यो वा ए॒तासा॑मा॒यत॑न॒-
ङ्क्लृप्ति॒व्ँवेदा॒ऽऽयत॑नवान् भवति॒ कल्प॑तेऽस्मा अनु॒सी॒तमुप॑ दधात्ये॒तद्वा आ॑सामा॒यत॑नमे॒षा क्लृप्ति॒र्
य ए॒वव्ँवेदा॒ऽऽयत॑नवान् भवति॒ कल्प॑तेऽस्मै द्व॒न्द्म॒न्या उप॑ दधाति॒ चत॑स्रो॒ मद्ध्ये॒ धृत्या॒ अन्न॒व्ँवा
इष्ट॑का ए॒तत् ख॒लु वै सा॒ख्षाद॒न्नय्ँयदे॒ष च॒रुर् यदे॒तञ्च॒रुमु॒प दधा॑ति सा॒ख्षा ॥ [९] ॥ दे॒वास्मा॒
अन्न॒मव॑ रुन्धे॒ मद्ध्य॒त उप॑ दधाति॒ मद्ध्य॒त ए॒वास्मा॒ अन्न॒न्दधा॑ति॒ तस्मा᳚न् मद्ध्य॒तोऽन्न॑मद्यते
बार्ह॒स्प॒त्यो भ॑वति॒ ब्रह्म॒ वै दे॒वाना॒म्बृह॒स्पति॒र् ब्रह्म॑णै॒वास्मा॒ अन्न॒मव॑ रुन्धे ब्रह्मव॒र्चसम॑सि ब्रह्म-
व॒र्चसाय॒ त्वेत्या॑ह ते॒जस्वी ब्र॑ह्मव॒र्चसी भ॑वति॒ यस्यै॒ष उ॑पधी॒यते॒ य उ॑ चैनमे॒वव्ँवेद॑ ॥ [१०] ॥

(अ॒मृत॑ मस्मै जायते॒ यस्यै॒ता उ॑पधी॒यन्ते॒ य उ॑प॒र्जन्य॑उप॒दधा॑ति सा॒ख्षाथ्स॒प्तच॑त्वारिꣳशच्च) ॥ २ ॥

भूतेष्टका उप दधात्यत्रात्र वै मृत्युर् जायते यत्रयत्रैव मृत्युर् जायते तत एवैनमव यजते तस्मादग्निचिथ् सर्वमायुरेति सर्वे ह्यस्य मृत्यवोऽवेष्टा स्तस्मादग्निचिन्नाभिचरितवै प्रत्यगेन मभिचारः स्तृणुते सूयते वा एष योऽग्निञ्चिनुते देवसुवामेतानि हवीꣳषि भवन्त्येतावन्तो वै देवानाꣳ सवास्त एवा ॥ [११] ॥ स्मै सवान् प्र यच्छन्ति त एनꣳ सुवन्ते सवोऽग्निर् वरुणसवो राजसूयम्ब्रह्मसवश्चित्यो देवस्य त्वा सवितुः प्रसव इत्याह सवितृप्रसूत एवैनम्ब्रह्मणा देवताभिरभि षिञ्चत्यन्नस्यान्नस्याभि षिञ्चत्यन्नस्यान्नस्यावरुद्ध्यै पुरस्तात् प्रत्यञ्चमभि षिञ्चति पुरस्ताद्धि प्रतीचीन मन्नमद्यते शीर्षतोऽभि षिञ्चति शीर्षतो ह्यन्नमद्यत आ मुखादन्ववस्रावयति ॥ [१२] ॥ मुखत एवास्मा अन्नाद्यन्दधात्यग्ने स्त्वा साम्राज्येनाभि षिञ्चामीत्याहैष वा अग्नेः सवस्तेनैवैनमभि षिञ्चति बृहस्पतेस्त्वा साम्राज्येनाभि षिञ्चामीत्याह ब्रह्म वै देवानाम्बृहस्पतिर् ब्रह्मणैवैनमभि षिञ्चतीन्द्रस्य त्वा साम्राज्येनाभि षिञ्चामीत्याहेन्द्रियमेवास्मिन्नुपरिष्टाद् दधात्येतद् ॥ [१३] ॥ वै राजसूयस्य रूपय्ँय एवव्ँविद्वानग्निञ्चिनुत उभावेव लोकावभि जयति यश्च राजसूयेनेजानस्य यश्चाग्निचित इन्द्रस्य सुषुवाणस्य दशधेन्द्रियव्ँवीर्यम्पराऽपतत् तद्देवाः सौत्रामण्या समभरन्थ् सूयते वा एष योऽग्निञ्चिनुतेऽग्निञ्चित्वा सौत्रामण्या यजेतेन्द्रियमेव वीर्यꣳ संभृत्याऽऽत्मन् धत्ते ॥ [१४] ॥

(त एवान्ववस्रावयत्येतदष्टाचत्वारिꣳशाच्च) ॥ ३ ॥

सजूरब्दोऽयावभिः सजूरुषा अरुणीभिः सजूः सूर्य एतशेन सजोषावश्विना दꣳसोभिः सजूरग्निर् वैश्वानर इडाभिर् घृतेन स्वाहा सव्ँवथ्सरो वा अब्दो मासा अयावा उषा अरुणी सूर्य एतश इमे अश्विना सव्ँवथ्सरोऽग्निर् वैश्वानरः पशव इडा पशवो घृतꣳ सव्ँवथ्सरम्पशवोऽनु प्र जायन्ते सव्ँवथ्सरेणैवास्मै पशून् प्र जनयति दर्भस्तंबे जुहोति यद् ॥ [१५] ॥ वा अस्या अमृतय्ँयद्वीर्यन्तद्दर्भा स्तस्मिन् जुहोति प्रैव जायतेऽन्नादो भवति यस्यैवञ्जुह्वत्येता वै देवता अग्नेः पुरस्ताद्भागा स्ता एव प्रीणात्यथो चक्षुरेवाग्नेः पुरस्तात् प्रति दधात्यनन्धो भवति य एवव्ँवेदाऽऽपो

वा इ॒दमग्रे॑ सलि॒लमा॑सी॒थ् स प्र॒जाप॑तिः पुष्कर॒पर्णे॑ वातो॑ भू॒तो॑ऽलेलाय॒थ् स ॥ [१६] ॥ प्र॑ति॒-
ष्ठान्नावि॑न्दत॒ स ए॒तद॒पाङ्कु॒लाय॑मपश्य॒त् तस्मि॑न्न॒ग्निम॑चिनु॒त तदि॒यम॑भव॒त् ततो॒ वै स प्रत्य॑ति-
ष्ठ॒द्याम्पु॒रस्ता॑दु॒पाद॑धा॒त् तच्छिरो॑ऽभव॒थ् सा प्राची॒ दिग्यान्द॑ख्षि॒णत उ॒पाद॑धा॒थ् स द॑ख्षि॑णः
प॒ख्षो॑ऽभव॒थ् सा द॑ख्षि॒णा दिग्याम्प॒श्चादु॒पाद॑धा॒त् तत् पुच्छ॑मभव॒थ् सा प्र॒तीची॒ दिग्यामु॑त्तर॒त
उ॒पाद॑धा॒थ् ॥ [१७] ॥ स उत्त॑रः प॒ख्षो॑ऽभव॒थ् सोदी॑ची॒ दिग्यामु॒परि॑ष्टादु॒पाद॑धा॒त् तत् पृ॒ष्ठ-
म॑भव॒थ् सोद्ध्र्वा दिगि॒यँव्वा अ॒ग्निः पञ्चे᳚ष्ट॒कस्तस्मा॒द्यद॒स्याङ्क्न॑न्त्य॒भीष्ट॑कान्तृ॒न्दन्त्य॒भि शर्क॑रा॒ꣳ॒
सर्वा॒ वा इ॒यँव्वयो᳚भ्यो॒ नक्त॑न्दृ॒शे दी᳚प्यते॒ तस्मा॑दि॒माँव्वया॑ꣳसि॒ नक्त॒न्नाद्ध्या॑सते॒ य ए॒वँव्वि॒द्वान॒ग्नि-
ञ्चि॒नुते प्र॒त्येव ॥ [१८] ॥ तिष्ठ॑त्य॒भि दिशो॑ जयत्याग्ने॒यो वै ब्रा᳚ह्म॒णस्तस्मा᳚द् ब्राह्म॒णाय॒ सर्वा॑सु
दि॒ख्ष्वर्द्धु॑क॒ꣳ॒ स्वामे॒व तद्दि॒शमन्वे᳚त्य॒पाँव्वा अ॒ग्निः कु॒लाय॒न्तस्मा॒दापो॒ऽग्निꣳ हारु॑काः॒ स्वामे॒व
तद्योनि॒म्प्र वि॑शन्ति ॥ [१९] ॥

(यद॑ लेलाय॒थ् सौत्त॑र॒त उ॒पाद॑धादे॒वद्वात्रि॑ꣳशच्च) ॥ ४ ॥

स॒ँव्व॒थ्स॒रमु॒ख्य॑म्भृ॒त्वा द्वि॒तीये॑ सँव्वथ्स॒र आ᳚ग्ने॒यम॒ष्टाक॑पाल॒न्निर्व॑पे॒दैन्द्रमेका॑दशकपाल॒ँव्वैश्व-
दे॒वन्द्वाद॑शकपाल॒म्बार्॒हस्प॒त्यञ्च॒रुँव्वै᳚ष्ण॒वन्त्रि॑कपा॒लन्तृ॒तीये॑ सँव्वथ्स॒रे॑ऽभि॒जिता॑ यजे॒त यद॒ष्टा-
क॑पालो॒ भव॑त्य॒ष्टाख्ष॑रा गाय॒त्र्या᳚ग्ने॒यङ्गा॑य॒त्रम्प्रा॑तस्सव॒नम्प्रा॑तस्सव॒नमे॒व तेन॑ दाधार गाय॒त्री-
ञ्छन्दो॒ यदेका॑दशकपालो॒ भव॒त्येका॑शाख्षरा त्रि॒ष्टु॒गैन्द्रन्त्रैष्टु॑भ॒म्माद्ध्य॑न्दिन॒ꣳ॒ सव॑न॒म्माद्ध्य॑न्दि-
न॒मेव सव॑न॒न्तेन॑ दाधार त्रि॒ष्टुभं॒ ॥ [२०] ॥ छन्दो॒ यद्द्वाद॑शकपालो॒ भव॑ति॒ द्वाद॑शाख्षरा॒ जग॑ती
वैश्वदे॒वञ्जाग॑तन्तृतीयसव॒नन्तृ॑तीयसव॒नमे॒व तेन॑ दाधा॒र् जग॑ती॒ञ्छन्दो॒ यद्बा॒र्हस्प॒त्यश्च॒रुर् भव॑ति॒
ब्रह्म॒ वै दे॒वाना॒म्बृह॒स्पति॒र् ब्रह्मै॒व तेन॑ दाधा॒र् यद्वै᳚ष्ण॒व स्त्रि॑कपा॒लो भव॑ति य॒ज्ञो वै विष्णु॑र् य॒ज्ञ-
मे॒व तेन॑ दाधा॒र् यत् तृ॒तीये॑ सँव्वथ्स॒रे॑ऽभि॒जिता॒ यज॑ते॒ऽभिजि॑त्यै॒ यथ् सँव्वथ्स॒रमु॒ख्य॑म्बि॒भर्ती॑-
ममे॒व ॥ [२१] ॥ तेन॑ लो॒कꣳ॒ स्पृ॑णोति॒ यद् द्वि॒तीये॑ सँव्वथ्स॒रे᳚ऽग्निञ्चि॑नु॒ते᳚ऽन्तरि॑ख्ष॒मेव॒ तेन॑
स्पृ॑णोति॒ यत् तृ॒तीये॑ सँव्वथ्स॒रे यज॑ते॒ऽमुमे॒व तेन॑ लो॒कꣳ॒ स्पृ॑णोत्ये॒तँव्वै पर॑ आट्णा॒रः क॒ख्षीवा॑ꣳ
औशि॒जो वी॒तह॑व्यः श्रा॒यस॒स्त्रस॑दस्युः पौरुकु॒थ्स्यः प्र॒जाका॑मा अचिन्वत॒ ततो॒ वै ते स॒हस्र॑ꣳस-

हस्रम्पुत्रानविन्दन्त प्रथते प्रजया पशुभिस्ताम्मात्रामाप्नोति यान्तेऽगच्छन्य एवव्विँद्वानेतमग्निञ्चिनुते ॥ [२२] ॥

(दाधार त्रिष्टुभं मिममेवै वं चत्वारिं च) ॥ ५ ॥

प्रजापतिरग्निमचिनुत स क्षुरपविर् भूत्वाऽतिष्ठत् तन्देवा बिभ्यतो नोपाऽऽयन् ते छन्दोभिरात्मानञ्छादयित्वोपाऽऽयन् तच्छन्दसाञ्छन्दस्त्वम्ब्रह्म वै छन्दाꣳसि ब्रह्मण एतद्रूपय्यँत् कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते छन्दोभिरेवाऽऽत्मानञ्छादयित्वाऽग्निमुप चरत्यात्मनोऽहिꣳसायै देवनिधिर् वा एष नि धीयते यदग्नि ॥ [२३] ॥ रन्ये वा वै निधिमगुप्तव्विँन्दन्ति न वा प्रति प्र जानात्युखामा क्रामत्यात्मानमेवाधिपाङ्कुरुते गुप्त्या अथो खल्वाहुर् नाऽऽक्रम्येति नैर्ऋत्युखा यदाक्रामेन्निर्ऋत्या आत्मानमपि दध्यात् तस्मान्नाऽऽक्रम्या पुरुषशीर्षमुप दधाति गुप्त्या अथो यथा ब्रूयादेतन्मे गोपायेति तादृगेव तत् ॥ [२४] ॥ प्रजापतिर्वा अथर्वाऽग्निरेव दध्यङ्ङाथर्वण स्तस्येष्टका अस्थान्येतꣳ ह वाव तदृषिरभ्यनूवाचेन्द्रो दधीचो अस्थभिरिति यदिष्टकाभिरग्निञ्चिनोति सात्मानमेवाग्निञ्चिनुते सात्मामुष्मिँल्लोके भवति य एवव्वेँद शरीरव्वाँ एतदग्नेर् यच्चित्य आत्मा वैश्वानरो यच्चिते वैश्वानरञ्जुहोति शरीरमेव सꣳस्कृत्या ॥ [२५] ॥ भ्यारोहति शरीरव्वाँ एतद्यजमानः सꣳ स्कुरुते यदग्निञ्चिनुते यच्चिते वैश्वानरञ्जुहोति शरीरमेव सꣳस्कृत्याऽऽत्मनाऽभ्यारोहति तस्मात् तस्य नाव द्यन्ति जीवन्नेव देवानप्येति वैश्वानर्यर्चा पुरीषमुप दधातीयव्वाँ अग्निर् वैश्वानर स्तस्यैषा चितिर् यत् पुरीषमग्निमेव वैश्वानरञ्चिनुत एषा वा अग्नेः प्रिया तनूर् यद्वैश्वानरः प्रियामेवास्य तनुवमव रुन्धे ॥ [२६] ॥

(अग्निस्तथ्सꣳस्कृत्याग्नेर्दश च) ॥ ६ ॥

अग्नेर् वै दीक्षया देवा विराजमाप्नुवन् तिस्रो रात्रीर् दीक्षितः स्यात् त्रिपदा विराड् विराजमाप्नोति षड्रात्रीर् दीक्षितः स्याथ् षड् वा ऋतवः सव्वँथ्सरः सव्वँथ्सरो विराड् विराजमाप्नोति दश रात्रीर् दीक्षितः स्याद्दशाक्षरा विराड् विराजमाप्नोति द्वादश रात्रीर् दीक्षितः

स्याद् द्वादश मासाः सँव्वँथ्सरः सँव्वँथ्सरो विराड् विराजमाप्नोति त्रयोदश रात्रीर् दीख्षितः स्यात् त्रयोदश ॥ [२७] ॥ मासाः सँव्वँथ्सरः सँव्वँथ्सरो विराड् विराजमाप्नोति पञ्चदश रात्रीर् दीख्षितः स्यात् पञ्चदश वा अर्द्धमासस्य रात्रयोऽर्द्धमासशः सँव्वँथ्सर आप्यते सँव्वँथ्सरो विराड् विराजमाप्नोति सप्तदश रात्रीर् दीख्षितः स्याद् द्वादश मासाः पञ्चर्तवः स सँव्वँथ्सरः सँव्वँथ्सरो विराड् विराजमाप्नोति चतुर्विꣳशतिꣳ रात्रीर् दीख्षितः स्याच्चतुर्विꣳशतिरर्द्धमासाः सँव्वँथ्सरः सँव्वँथ्सरो विराड् विराजमाप्नोति त्रिꣳशतꣳ रात्रीर् दीख्षितः स्यात् ॥ [२८] ॥ त्रिꣳशदख्षरा विराड् विराजमाप्नोति मासन्दीख्षितः स्याद्यो मासः स सँव्वँथ्सरः सँव्वँथ्सरो विराड् विराजमाप्नोति चतुरो मासो दीख्षितः स्याच्चतुरो वा एतम्मासो वसवोऽबिभरुस्ते पृथिवीमाऽजयन् गायत्रीञ्छन्दोऽष्टौ रुद्रास्तेऽन्तरिख्षमाऽजयन् त्रिष्टुभञ्छन्दो द्वादशाऽऽदित्या स्ते दिवमाऽजयन् जगतीञ्छन्दस्ततो वै ते व्यावृत मगच्छञ्छ्रैष्ठ्यन्देवानान्तस्माद् द्वादश मासो भृत्वाऽग्निञ्चिन्वीत द्वादश मासाः सँव्वँथ्सरः सँव्वँथ्सरोऽग्नि श्चित्य स्तस्याहोरात्राणीष्टका आप्तेष्टकमेनञ्चिनुतेऽथो व्यावृतमेव गच्छति श्रैष्ठ्यꣳ समानानाम् ॥ [२९] ॥

(स्यात् त्रयोदश त्रिꣳशतꣳ रात्रीर् दीख्षितः स्याद् वै तेऽष्टाविꣳशतिश्च) ॥ ७ ॥

सुवर्गाय वा एष लोकाय चीयते यदग्निस्तय्ँयन्नान्वारोहेथ् सुवर्गाल्लोकाद्यजमानो हीयेत पृथिवीमाऽक्रमिषम्प्राणो मा मा हासीदन्तरिख्षमाऽक्रमिषम्प्रजा मा मा हासीद्दिवमाऽक्रमिषꣳ सुवरगन्मेत्याहैष वा अग्नेरन्वारोहस्तेनैवैनमन्वारोहति सुवर्गस्य लोकस्य समष्ट्यै यत् पख्षसंमिताम्मिनुयात् ॥ [३०] ॥ कनीयाꣳसय्ँयज्ञक्रतुमुपेयात् पापीयस्यस्याऽऽत्मनः प्रजा स्याद्वेदिसम्मिताम्मिनोति ज्यायाꣳसमेव यज्ञक्रतुमुपैति नास्याऽऽत्मनः पापीयसी प्रजा भवति साहस्रञ्चिन्वीत प्रथमं चिन्वानः सहस्रसम्मितो वा अयल्ँलोक इममेव लोकमभि जयति द्विषाहस्रञ्चिन्वीत द्वितीयं चिन्वानो द्विषाहस्रँव्वा अन्तरिख्षमन्तरिख्षमेवाभि जयति त्रिषाहस्रञ्चिन्वीत तृतीयञ्चिन्वान ॥ [३१] ॥ त्रिषाहस्रो वा असौ लोकोऽमुमेव लोकमभि जयति जानुदघ्नञ्चिन्वीत प्रथमञ्चिन्वानो गायत्रियैवेमल्ँलोकमभ्यारोहति नाभिदघ्नञ्चिन्वीत द्वितीयञ्चिन्वान स्त्रिष्टुभैवान्तरिख्षमभ्यारोहति ग्रीवदघ्नञ्चिन्वीत तृतीयञ्चिन्वानो जगत्यैवामुल्ँलोकमभ्यारोहति नाग्निञ्चित्वा

रा॒मामुपे॑याद॒योनौ॒ रेतो॑ धास्या॒मीति॒ न द्वि॒तीय॑ञ्चि॒त्वाऽन्यस्य॒ स्त्रिय॒ ॥ [३२] ॥ मुपे॑या॒न्न तृ॒ती-
य॑ञ्चि॒त्वा काञ्च॒नोपे॑या॒द्रेतो॒ वा ए॒तन्नि ध॑त्ते॒ यद॒ग्निञ्चि॑नु॒ते यदु॑पे॒याद् रेत॑सा॒ व्यृ॑द्ध्ये॒ताथो॒ खल्वा॑हुर
प्र॒जस्य॒न्तद्यन्नो॒पेया॑दि॒ति यद्रे॑त॒स्सिचा॑वु॒पद॒धा॑ति॒ ते ए॒व यज॑मानस्य॒ रेतो॑ बिभृ॒त स्तस्मा॒दुपे॑या॒द्रे-
त॒सोऽस्क॑न्दा॒य त्रीणि॒ वाव रेता॑ꣳसि पि॒ता पु॒त्रः पौत्रो॒ ॥ [३३] ॥ यद् द्वे रे॑त॒स्सिचा॑वु॒पद॒द्ध्या-
द्रेतो᳚ऽस्य॒ वि च्छि॑न्द्या॒त् ति॒स्र उप॑ दधाति॒ रेत॑सः॒ सन्त॑त्या इ॒यँव्वाव प्र॑थ॒मा रे॑त॒स्सिग् वाग् वा इ॒य-
न्तस्मा॒त् पश्य॑न्ती॒माम्पश्य॑न्ति॒ वा॒चँव्वद॑न्ती॒मन्तरि॑ख्ष॒न्द्वि॒तीया᳚ प्रा॒णो वा अ॒न्तरि॑ख्ष॒न्तस्मा॒न्ना-
न्तरि॑ख्ष॒म्पश्य॑न्ति॒ न प्रा॒णम॒सौ तृ॒तीया॒ चख्षु॒र् वा अ॒सौ तस्मा॒त् पश्य॑न्त्य॒मूं पश्य॑न्ति॒ चख्षु॒र्
यजु॑षे॒माञ्चा॒ ॥ [३४] ॥ मूञ्चोप॑ दधाति॒ मन॑सा मद्ध्य॒मामे॒षाँल्लो॒काना॒ङ्क्लृप्त्या॒ अथो᳚ प्रा॒णाना॑मि॒ष्टो
य॒ज्ञो भृगु॑भि राशी॒र्दा वसु॑भि॒स्तस्य॑ त इ॒ष्टस्य॑ वी॒तस्य॒ द्रवि॑णे॒ह भ॑ख्षी॒येत्या॑ह स्तुतश॒स्त्रे ए॒वैतेन॑
दु॒हे पि॒ता मा॑त॒रिश्वाऽच्छि॑द्रा प॒दा धा॒ अच्छि॑द्रा उ॒शिजः॑ प॒दाऽनु॑ तख्षुः॒ सोमो॑ विश्व॒विन् ने॒ता
ने॑ष॒द् बृह॒स्पति॑रुक्थाम॒दानि॑ शꣳसिष॒दित्या॑है॒तद्वा अ॒ग्नेरु॒क्थन्ते॒नै॒वैन॒मनु॑ शꣳसति ॥ [३५] ॥
(मि॒नु॒या॒त्तृ॒तीय॑ञ्चि॒न्वा॒नःस्त्रियं॒पौत्र॑ श्च॒वैस॒प्त च॑) ॥ ८ ॥

सूय॒ते वा ए॒षो᳚ऽग्नी॒नाय्ँय उ॒खाया᳚म्भ्रि॒यते॒ यद॒धः सा॒द॒येद्गर्भा᳚ः प्र॒पादु॑काः स्यु॒रथो॒ यथा॑ स॒वात्
प्र॑त्यव॒रोह॑ति ता॒दृगे॒व तदा॑स॒न्दी सा॑दयति॒ गर्भा॑णा॒न्धृत्या॒ अप्र॑पादा॒याथो॑ स॒वमे॒वैन॑ङ्करोति॒ गर्भो॒
वा ए॒ष यदु॒ख्यो॒ योनि॑ः शि॒क्य॑य्ँयच्छि॒क्या॑दु॒खान्नि॒रूहे॒द्योने॒र् गर्भ॒न्निर्॒हण्या॒थ् षड्डु॑द्यामꣳ शि॒क्य-
म्भवति॒ षोढावि॑हि॒तो वै ॥ [३६] ॥ पुरु॑ष आ॒त्मा च॒ शिर॑श्च च॒त्वार्यङ्गा᳚न्या॒त्मन्ने॒वैना॑म्बिभर्ति
प्र॒जाप॑ति॒र् वा ए॒ष यद॒ग्निस्तस्यो॒खा चो॒लूख॑लञ्च॒ स्तनौ॒ ताव॑स्य प्र॒जा उप॑ जीवन्ति॒ यदु॒खाञ्चो॒-
लूख॑लञ्चोप॒दधा॑ति॒ ताभ्या॑मे॒व यज॑मानो॒ऽमुष्मि॑ँल्लो॒के᳚ऽग्निन्दु॑हे सँव्वथ्स॒रो वा ए॒ष यद॒ग्निस्तस्य॑
त्रेधावि॑हि॒ता इष्ट॑काः प्राजाप॒त्या वै᳚ष्ण॒वीर् ॥ [३७] ॥ वै᳚श्वकर्म॒णीर॑हो॒रा॒त्राण्ये॒वास्य॑ प्राजाप॒त्या
यदु॒ख्य॑म्बि॒भर्ति॑ प्राजाप॒त्या ए॒व तदुप॑ धत्ते॒ यथ् स॒मिध॑ आ॒दधा॑ति वैष्ण॒वा वै व॒नस्पत॑यो वैष्ण॒वीरे॒व
तदुप॑ धत्ते॒ यदिष्ट॑काभि॒रग्नि॒ञ्चि॒नोती॒यँव्वै वि॒श्वक॑र्मा वैश्वकर्म॒णीरे॒व तदुप॑ धत्ते॒ तस्मा॑दाहु॒स्त्रि॒वृद॒ग्नि-
रिति॒ तँव्वा ए॒तय्ँयज॑मान ए॒व चि॑न्वी॒त यद॑स्या॒न्य श्चि॑नु॒याद्यत् तन्दख्षि॑णाभि॒र् न रा॒धये॑द॒ग्निम॑स्य
वृञ्जी॒त यो᳚ऽस्या॒ग्निञ्चि॑नु॒यात् तन्दख्षि॑णाभी राधये॒द॒ग्निमे॒व तथ् स्पृ॑णोति ॥ [३८] ॥

(षोढाविहितो वै वैष्णवी रन्यो विंशतिश्च) ॥ ९ ॥

प्रजापतिरग्निमचिनुतर्तुभिः सँव्वथ्सरँव्वसन्तेनैवास्य पूर्वार्द्धमचिनुत ग्रीष्मेण दक्षिणम्पक्षँव्वर्षाभिः पुच्छꣳ शरदोत्तरम्पक्षꣳ हेमन्तेन मद्ध्यम्ब्रह्मणा वा अस्य तत् पूर्वार्द्धमचिनुत क्षत्रेण दक्षिणम्पक्षम्पशुभिः पुच्छँव्विशोत्तरम्पक्षमाशया मद्ध्यँय्य एवँव्विद्वानग्निञ्चिनुत ऋतुभिरेवैनञ्चिनुतेऽथो एतदेव सर्वमव ॥ [३९] ॥ रुन्धे शृण्वन्त्येनमग्निञ्चिक्यानमत्त्यन्नꣳ रोचत इयँव्वाव प्रथमा चितिरोषधयो वनस्पतयः पुरीषमन्तरिक्षन्द्वितीया वयाꣳसि पुरीषमसौ तृतीया नक्षत्राणि पुरीषँय्यज्ञश्चतुर्थी दक्षिणा पुरीषँय्यजमानः पञ्चमी प्रजा पुरीषँय्यत् त्रिचितीकञ्चिन्वीत यज्ञन्दक्षिणामात्मानं प्रजामन्तरियात् तस्मात् पञ्चचितीकश्चेतव्यं एतदेव सर्वꣳ स्पृणोति यत् तिस्रश्चितय ॥ [४०] ॥ त्रिवृद्ध्यग्निर् यद् द्वे द्विपाद्यजमानः प्रतिष्ठित्यै पञ्च चितयो भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सम्पद्यन्ते दशाक्षरो वै पुरुषो यावानेव पुरुषस्तꣳ स्पृणोत्यथो दशाक्षरा विराडन्नँव्विराड् विराज्येवान्नाद्ये प्रति तिष्ठति सँव्वथ्सरो वै षष्ठी चितिर् ऋतवः पुरीषꣳ षट् चितयो भवन्ति षट् पुरीषाणि द्वादश सम्पद्यन्ते द्वादश मासाः सँव्वथ्सरः सँव्वथ्सर एव प्रति तिष्ठति ॥ [४१] ॥

(अव चितयः पुरीषं पञ्चदश च) ॥ १० ॥

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते प्राजापत्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते रौद्राः श्येतः श्येताक्षः श्येतग्रीवस्ते पितृदेवत्यास्तिस्रः कृष्णा वशा वारुण्यस्तिस्रः श्वेता वशाः सौर्यो मैत्राबार्हस्पत्या धूम्रललामास्तूपराः ॥ [४२] ॥

(रोहितः षड्विꣳशतिः) ॥ ११ ॥

पृश्निस्तिरश्चीनपृश्निरूर्द्ध्वपृश्निस्ते मारुताः फल्गूर् लोहितोर्णी बलक्षी ताः सारस्वत्यः पृषती स्थूलपृषती क्षुद्रपृषती ता वैश्वदेव्यस्तिस्रः श्यामा वशाः पौष्णियस्तिस्रो रोहिणीर् वशा मैत्रियं ऐन्द्राबार्हस्पत्या अरुणललामा स्तूपराः ॥ [४३] ॥

(पृश्निः षड्विꣳशतिः) ॥ १२ ॥

शितिबाहुरन्यतश्शितिबाहुः समन्तशितिबाहुस्त ऐन्द्रवायवाः शितिरन्ध्रोऽ न्यतश्शितिरन्ध्रः समन्तशितिरन्ध्रस्ते मैत्रावरुणाः शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनास्तिस्रः शिल्पा वशा वैश्वदेव्यस्तिस्रः श्येनीः परमेष्ठिने सोमापौष्णाः श्यामलललामा स्तूपराः ॥ [४४] ॥

(शितिबाहुः पञ्चविꣳशतिः) ॥ १३ ॥

उन्नत ऋषभो वामनस्त ऐन्द्रावरुणाः शितिककुच्छितिपृष्ठः शितिभसत् त ऐन्द्राबार्हस्पत्याः शितिपाच्छित्योष्ठः शितिभ्रुस्त ऐन्द्रावैष्णवास्तिस्रः सिद्ध्मा वशा वैश्वकर्मण्यस्तिस्रो धात्रे पृषोदरा ऐन्द्रापौष्णाः श्येतललामा स्तूपराः ॥ [४५] ॥

(उन्नतःपञ्चविꣳशतिः) ॥ १४ ॥

कर्णा स्त्रयो यामाः सौम्या स्त्रयः श्वितिङ्गा अग्नये यविष्ठाय त्रयो नकुला स्तिस्रो रोहिणी स्त्र्यव्य स्ता वसूनान्तिस्रोऽरुणा दित्यौह्य स्ता रुद्राणाꣳ सोमैन्द्रा बभ्रुललामा स्तूपराः ॥ [४६] ॥

(कर्णा स्त्रयोविꣳशतिः) ॥ १५ ॥

शुण्ठा स्त्रयो वैष्णवा अधीलोधकर्णा स्त्रयो विष्णव उरुक्रमाय लप्सुदिन स्त्रयो विष्णव उरुगायाय पञ्चावी स्तिस्र आदित्यानान्त्रिवथ्सा स्तिस्रोऽङ्गिरसामैन्द्रावैष्णवा गौरललामा स्तूपराः ॥ [४७] ॥

(शुण्ठा विꣳशतिः) ॥ १६ ॥

इन्द्राय राज्ञे त्रयः शितिपृष्ठा इन्द्रायाधिराजाय त्रयः शितिककुद इन्द्राय स्वराज्ञे त्रयः शितिभसदस्तिस्र स्तुर्यौह्यः साद्ध्यानान्तिस्रः पष्ठौह्यो विश्वेषान्देवानामाग्नेन्द्राः कृष्णललामा स्तूपराः ॥ [४८] ॥

(इन्द्राय राज्ञे द्वाविंꣳशतिः) ॥ १७ ॥

अदित्यै त्रयो रोहितैता इन्द्राण्यै त्रयः कृष्णैताः कुह्वै त्रयोऽरुणैता स्तिस्रो धेनवो राकायै त्रयोऽनड्वाहः सिनीवाल्या आग्नावैष्णवा रोहितललामास्तूपराः ॥ [४९] ॥

(अदित्या अष्टादश) ॥ १८ ॥

सौम्या स्त्रयः पिशंगाः सोमाय राज्ञे त्रयः सारङ्गाः पार्जन्या नभोरूपा स्तिस्रोऽजा मल्हा इन्द्राण्यै तिस्रो मेष्य आदित्या द्यावापृथिव्या मालङ्गा स्तूपराः ॥ [५०] ॥

(सौम्याएकान्नविंꣳशतिः) ॥ १९ ॥

वारुणा स्त्रयः कृष्णललामा वरुणाय राज्ञे त्रयो रोहितललामा वरुणाय रिशादसे त्रयोऽरुणललामाः शिल्पा स्त्रयो वैश्वदेवा स्त्रयः पृश्नयः सर्वदेवत्या ऐन्द्रासूराः श्येतललामा स्तूपराः ॥ [५१] ॥

(वारुणा विंꣳशतिः) ॥ २० ॥

सोमाय स्वराज्ञेऽनोवाहावनड्वाहाविन्द्राग्निभ्यामोजोदाभ्यामुष्टाराविन्द्राग्निभ्यां बलदाभ्याꣳ सीरवाहाववी द्वे धेनू भौमी दिग्भ्यो वडबे द्वे धेनू भौमी वैराजी पुरुषी द्वे धेनू भौमी वायव आरोहणवाहावनड्वाहौ वारुणी कृष्णे वशे अराड्यौ दिव्यावृषभौ परिमरौ ॥ [५२] ॥

(सोमाय स्वराज्ञे चतुस्त्रिꣳशत्) ॥ २१ ॥

एकादश प्रातर् गव्याः पशव आ लभ्यन्ते छगलः कल्माषः किकिदीविर् विदीगय स्ते त्वाष्ट्राः सौरीर् नव श्वेता वशा अनूबन्ध्या भवन्त्याग्नेय ऐन्द्राग्न आश्विन स्ते विशालयूप आ लभ्यन्ते ॥ [५३] ॥

(एकादश प्रातःपञ्चविꣳशतिः) ॥ २२ ॥

पिशङ्गा स्त्रयो वासन्ताः सारङ्गा स्त्रयो ग्रैष्माः पृषन्त स्त्रयो वार्षिकाः पृश्नय स्त्रयः शारदाः पृश्निसक्था स्त्रयो हैमन्तिका अवलिप्ता स्त्रयः शैशिराः संवथ्सराय निवक्षसः ॥ [५४] ॥

(पिशङ्गा विꣳशतिः) ॥ २३ ॥

## समाप्ति कोर्वैः

(रोहितः कृष्णा धूम्रललामाः पृश्निः श्यामा अरुणललामाः शितिबाहुः शिल्पाः श्येनीः श्यामललामा उन्नतः सिद्ध्मा धात्रे पौष्णाः श्येतललामाः कर्णा बभ्रुललामाः शुण्ठा गौरललामा इन्द्राय कृष्णाललामा अदित्यै रोहितललामाः सौम्या मालङ्गा वारुणाः सूराः श्येतललामा दश।)

(हिरण्यवर्णा अपाङ्गहान् भूतेष्टकाः सजूः संवथ्सरं प्रजापतिः स क्षुरपवि रग्नेर् वै दीक्षया सुवर्गाय तय्यँन्न सूयते प्रजापतिर्त्रऋतुभी रोहितः पृश्निः शितिबाहु रुन्नतः कर्णाः शुण्ठा इन्द्राया दित्यै सौम्या वारुणाः सोमायै कादश पिशङ्गा स्त्रयोविꣳशतिः)

(हिरण्यवर्णा भूतेष्टका श्छन्दो यत् कनीयाꣳसन्त्रिवृद्ध्यग्निर्वारुणा श्चतुष्पञ्चाशत्)

(हिरण्यवर्णा निवक्षसः)

॥ हरिः ॐ ॥

**पञ्चमकाण्डे षष्ठः प्रश्नः समाप्तः**

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| २३ | ५४ |

ॐ